CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

Coll. No. 277

Title Taittiriya Upanisad
Anandavalli

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 277 Subject: Vedic Literature

Title: Taittiriyopanisad

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.8" by 4.5 Extent: 4

Language: Sanskrit Script: Devanagari

Remarks: Shantavalli.

॥ श्री ॥ तद्ब्रह्मेति । सतपोऽतप्यत । सतपस्तप्त्वा ॥ १ ॥ अन्नं ब्रह्मेति व्यजानात् ॥
अन्नाद्ध्येव खल्विमानि भूतानि जायंते । अन्नेन जातानि जीवंति । अन्नं प्र
यंत्यभिसंविशंतीति । तद्विज्ञाय पुनरेवावरुणमेव पितरमुपससार । अ
धीहि भगवो ब्रह्मेति । तꣳहोवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति ॥
सतपोऽतप्यत । सतपस्तप्त्वा ॥ २ ॥ प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्वि
मानि भूतानि जायंते ॥ प्राणेन जातानि जीवंति ॥ प्राणं प्रयंत्यभिसंविशं
तीति ॥ तद्विज्ञाय ॥ पुनरेवावरुणमेव पितरमुपससार । अधीहि भगवो ब्रह्मेति ॥

तꣳहोवाचतपसाब्रह्मविजिज्ञासस्व।तपोब्रह्मेति।सतपोतप्यत।सतपस्तप्त्वा॥३॥मनोब्रह्मेति
व्यजानात्।मनसोह्येवखल्विमानिभूतानिजायंते।मनसाजातानिजीवंति।मनःप्रयंत्यभि
संविशंतीति।तद्विज्ञायपुनरेववरुणंपितरमुपससार।अधीहिभगवोब्रह्मेति।
तꣳहोवाच।तपसाब्रह्मविजिज्ञासस्व।तपोब्रह्मेति।सतपोतप्यतसतपस्तप्त्वा॥४॥
विज्ञानंब्रह्मेतिव्यजानात्।विज्ञानाध्येवखल्विमानिभूतानिजायंते।विज्ञानेनजातानिजी
वंति।विज्ञानंप्रयंत्यभिसंविशंतीति।तद्विज्ञाय।पुनरेववरुणंपितरमुपससार।अधी
हिभगवोब्रह्मेति।तꣳहोवाच।तपसाब्रह्मविजिज्ञासस्व।तपोब्रह्मेति।सतपोतप्यत।

सतपस्तप्त्वा॥५॥आनंदोब्रह्मेतिव्यजानात्।आनंदाध्येवखल्विमानिभूतानिजायंते
।आनंदेनजातानिजीवंति।आनंदंप्रयंत्यभिसंविशंतीति।सैषाभार्गवीवारुणीविद्या।
परमेव्योमन्प्रतिष्ठिता।यएवंवेदप्रतितिष्ठति।अन्नवानन्नादोभवतिमहान्भवतिप्र
जयापशुभिर्ब्रह्मवर्चसेन।महान्कीर्त्या॥६॥अन्नंनपरिचक्षीत।तद्व्रतं।प्राणेशरीरंप्र
तिष्ठितं।शरीरेप्राणःप्रतिष्ठितः।तदेतदन्नमन्नेनप्रतिष्ठितं।सयएतदन्नमन्नेनप्रति
ष्ठितंवेदप्रतिष्ठति।अन्नवानन्नादोभवति।महान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेन
।महान्कीर्त्या॥७॥अन्नंनपरिचक्षीत।तद्व्रतं।आपोवाअन्नं।ज्योतिरन्नाद।अग्नि

ज्योतिः प्रतिष्ठितं। ज्योतिष्यापः प्रतिष्ठिताः। तदेतदन्नमन्ने प्रतिष्ठितं। सयएतदन्नमन्ने प्र
तिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्च
सेन महान्कीर्त्या ॥८॥ अन्नं बहु कुर्वीत। तद्व्रतं। पृथिवी वा अन्नं। आकाशोन्नादः। पृथि
व्यामाकाशाः प्रतिष्ठिताः। आकाशोपृथिवी प्रतिष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितं। सयए
तदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान्भवति प्रजया पशु
भिर्ब्रह्मवर्चसेन। महान्कीर्त्या ॥९॥ नकंचन वसतौ प्रत्याचक्षीत। तद्व्रतं। तस्माद्य
याकया चिद्विधया बहून्नं प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते। एतद्वै मुखतो

न्नं राद्धं। मुखतोस्मा अन्नं राध्यते। एतद्वै मध्यतोन्नं राद्धं। मध्यतोस्मा अन्नं राध्य
ते। एतद्वा अंततोन्नं राद्धं। अंततोस्मा अन्नं राध्यते। यएवं वेद। क्षेम इति वाचि। योग क्षेम
इति प्राणापानयोः। कर्मेति हस्तयोः। गतिरिति पादयोः। विमुक्तिरिति पायौ। इति मानुषीः स
माज्ञाः। अथ दैवीः। तृप्तिरिति वृष्टौ। बल मिति विद्युति। यश इति पशुषु। ज्योतिरिति न
क्षत्रेषु। प्रजातिरमृतमानंद इत्युपस्थे। सर्वमित्याकाशे। तत्प्रतिष्ठेत्युपासीत। प्रतिष्ठा
वान्भवति। तन्महइत्युपासीत। महान्भवति। तन्मनइत्युपासीत। मानवान्भवति।
तन्नमइत्युपासीत। नम्यंतेस्मै कामाः। तद्ब्रह्मेत्युपासीत। ब्रह्मवान्भवति। तद्ब्रह्म

णःपरिमरइत्युपासीत। पर्येणंम्रियंतेद्विषंतःसपत्नाः। पर्येप्रियाभ्रातृव्याः। सयश्चायंपु
रुषे। यश्चासावादित्येसएकः। सयएवंवित्। अस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मान
मुपसंक्रम्य। एतंप्राणमयमात्मानमुपसंक्रम्य। एतंमनोमयमात्मानमुपसंक्रम्य। ए
तंविज्ञानमयमात्मानमुपसंक्रम्य। एतमानंदमयमात्मानमुपसंक्रम्य। इमाल्लोका
न्कामान्नीकामरूप्यनुसंचरन्। एतत्सामगायन्नास्ते। हा३वु हा३वु हा३वु। अहम
न्नमहमन्नमहमन्नं। अहमंनादो३ओहमंनादो३ओहमंनादः। अहꣳश्लोक
कृदहꣳश्लोककृदहꣳश्लोककृत्। अहमस्मिप्रथमजाऋता३स्य। पूर्वंदेवेभ्यो
अमृतस्यना३भायि। योमाददातिसइदेवमा३वाः। अहमन्नमन्नमदंतमा३
द्मि। अहंविश्वंभुवनमभ्यभवंसुवर्नज्योतीः। यएवंवेद। इत्युपनिषत्॥९॥
सहनाववतु। सहनौभुनक्तु। सहवीर्यंकरवावहै। तेजस्विनावधीतमस्तु